शास्त्री-II साहित्य

रत्नावली-नाटिका

द्वितीयोऽङ्कः

Date __/__/__

कण्ठे श्रीपुरुषोत्तमस्य समरे दृष्ट्वा मणिं शत्रुभि-
र्नष्टं मन्त्रबलाद्वसन्ति वसुधामूले भुजङ्गा हताः ।
पूर्वं लक्ष्मणवीरवानरभटा ये मेघनादाहताः
पीत्वा तेऽपि महौषधेर्गुणनिधेर्गन्धं पुनर्जीविताः ॥

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि श्रीहर्षदेव प्रणीतस्य रत्नावली नाटिकायाः द्वितीयोऽङ्कात् उद्धृतोऽस्ति ।

व्याख्या — समरे = युद्धे, श्रीपुरुषोत्तमस्य = भगवतो विष्णोः । कण्ठे = ग्रीवायाम् । मणिम् = कौस्तुभमणिम् । दृष्ट्वा = अवलोक्य । शत्रुभिः = अरिभिः । नष्टम् = अदृश्यत्वं गतम् । भुजङ्गाः = सर्पाः । मन्त्रबलात् = मन्त्रप्रभावात् । हताः = ताडिताः । (सन्तः) वसुधामूले = भूगर्भे । वसन्ति = निवसन्ति । पूर्वम् = पुरा । ये मेघनादाहताः = मेघनादनाम्ना रावणपुत्रेण हताः = ताडिताः लक्ष्मणवीरवानरभटाः = लक्ष्मणश्चासौ वीरः = वीरसौमित्रिः वानरभटाश्च = सुग्रीवादिकपिवीराश्च । तेऽपि = त एव तेऽपि । गुणनिधेः = गुणानाम् = मृतसंजीवनादीनाम् । निधेः = आकरस्य गुणगणस्य । महौषधेः = सञ्जीवन्याः । गन्धम् = आमोदम् । पीत्वा = आघ्राय । पुनः = भूयः । जीविताः = सम्प्रबुद्धाः ।
अत्र शार्दूलविक्रीडितं वृत्तम् ।

Renu Devi
27/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

शास्त्री-I - साहित्य
अभिज्ञानशाकुन्तलम्
षष्ठोऽङ्कः

Date ___/___/___

प्र०(1) — पद्यमिदम् व्याख्येयम् ।
संरोपितेऽप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा ।
कल्पिष्यमाणा महते फलाय वसुन्धरा काल इवोप्तबीजा ॥

उत्तरम् = प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य षष्ठोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा दुष्यन्तः प्रागुक्तमेवार्थं दुःखातिशयेन विशदीकुर्वन्नब्रवीत् — काले = बीजारोपणसमये, अपेक्षिते समये उप्तानि आहितानि बीजानि यस्यां सा उप्तबीजा कृतबीजवपना न्यस्तबीजा महते = प्रभूताय परिणामाय, फलोत्पत्तये फलाय = कल्याणलाभाय सन्तानरूपाय कल्पिष्यमाणा प्रसविष्यी सम्पत्स्यमाना वसुन्धरेव रत्नमयी भूमिरिव काले = ऋतुकाले निहितवीर्या महते = बृहते फलाय = सन्तानरूपाय कल्पिष्यमाणा = प्रसविष्यी कुलप्रतिष्ठा = वंशालम्बनभूता — परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे ।
समुद्ररशना चोर्वी सखी च युवयोरियम् ॥
कुलस्य = पुरुवंशस्य प्रतिष्ठा = अवलम्बनरूपा स्थितिहेतुभूता धर्मपत्नी = धर्मभार्या अर्द्धाङ्गिनी शकुन्तला आत्मनि = स्वस्मिन् संरोपिते पुनगर्भे उत्पादितेऽपि वीर्यनिषेकात् गर्भरूपेण आत्मनि तस्या शकुन्तलायां योजितेऽपि — पतिः भार्यां संप्रविश्य गर्भो भूत्वेह जायते ।
जायायास्तद्धि जायत्वं यदस्यां जायते पुनः ॥
आत्मा प्रविश्य जायायां पुत्ररूपेण जायते' इति स्मृतेः 'आत्मा वै पुत्रनामासि' इत्यात्मनः पुत्रत्वं श्रुतेश्च मया = दुष्यन्तेन धार्मिकेण त्यक्ता नाम = परित्यक्ता निराकृता नाम् । अत्रोपमा काव्यलिंगं चालङ्कारौ छन्दश्चोपजातिः ।

Renu Devi
27/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री - I साहित्य तृतीय - पत्रम्

किरातार्जुनीय - प्रथमः सर्गः

Saathi

Date ___/___/___

प्र०(1) - सखीनिव प्रीतियुजोऽनुजीविनः समानमानान्सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम्॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति कथयति -

व्याख्या - गतस्मयः = नष्ट हो गया है अहंकार जिसका (ऐसा), सः = वह (दुर्योधन) सन्ततं = सदा। अनुजीविनः = सेवकों को, प्रीतियुजः = प्रेम से युक्त, सखीन् इव = मित्रों की तरह। सुहृदः = मित्रों को, बन्धुभिः = बन्धुओं (भाइयों) के, समानमानान् = समान आदर वाले (और), बन्धुताम् = भ्रातृसमूह को, कृताधिपत्याम् इव = (स्वयं) किया है शासन जिन्होंने (ऐसे), साधु = अच्छी प्रकार, दर्शयते = दिखाता है

Renu Devi
27/08/20
राध्या उमाकान्त सं० महावि० सुखसेना,
पूर्णिया।

Page No.

उपशास्त्री - II साहित्य - तृतीय - पत्रम

किरातार्जुनीयम - प्रथमः सर्गः

प्र० ११ पुरः सरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति। अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - तेजस्विनामग्रगण्या यश एव धनं मन्यमाना भवादृशामहापुरुषा अपि एवविधं तिरस्कारं प्राप्य तूष्णींभूतास्तिष्ठन्ति चेत् तर्हि मनस्विता कमवलम्ब्य स्थास्यति सा तु विनष्टैवेति मन्ये।

व्याख्या - धामवतां = तेजस्विनाम्, पुरःसराः = अग्रेसराः, यशोधनाः = यश एव धनं भवादृशाः = भवादृशमहापुरुषा, सुदुःसहम् = अतिदुःसहम्, ईदृशम् = उक्त - प्रकारं, निकारं = पराभवं प्राप्य, रतिं = सन्तोषम्। अधिकुर्वते = स्वीकुर्वते, चेत = तर्हि। हन्तेति = खेदे। मनस्विता = अभिमानिता। निराश्रया सती हता = तेजस्विजनैकशरणत्वान्मनस्वितायाः इत्यर्थः।

Renu Devi
27/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

Page No.